# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-३ ( Sem_6 ) | प्रश्नपत्र-६ | गुणाः - ७० |
| विषयः - पुराणेतिहासः | CC 3.6.12 | समयः - ११:०० तः ०२:०० |
| दिनाङ्कः - २३-०४-२०१६ | सन्दर्भग्रन्थः -शान्तिपर्व ( १३१ तः १७३ अध्यायाः ) | |

---

### युनिट-१

**प्रश्नः -१ कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कुरुत ।** ०८

*(१) आयरण्यं समाश्रीत्य परेन्मृगगणैः सह*
*न त्वेवोज्झितमर्यादैर्दस्युभिः सहितश्चरेत् ॥*

*(२) मित्रं च शत्रुतामेव कस्मिश्चित् कालपर्यये ।*
*शत्रुश्च मित्रतामेति स्वर्थो ही बलवत्तरः ॥*

*(३) भक्ष्यार्थं क्रीडनार्थं च नरा वाञ्छन्ति पक्षिणः ।*
*तृतीयो नास्ति संयोगो वधबन्धादृते क्षमः ॥*

**प्रश्नः -२ पूजनीयप्रसङ्गं सविस्तरं लिखत ।** ०८

**अथवा**

**विडालमूषककथां सबोधं लिखत ।**

**प्रश्नः -३ द्वयोः टिप्पणी कार्या ।** ०४

*(१) मत्स्यकथा ।*
*(२) दस्युवृत्तिनिन्दा ।*
*(३) कायव्यः ।*
*(४) राज्ञां कर्तव्यम् ।*

**प्रश्नः -४ पञ्चानां लघूत्तराणि लिखत ।** ०५

*(१) मार्जारस्य नाम किमवर्तत ?*
*(२) मूषिकस्य नाम किमवर्तत ?*
*(३) साप्तपदं मैत्रं नाम किम् ?*
*(४) शत्रुः मित्रतां कदा प्राप्नोति ?*
*(५) ब्रह्मदत्तः कः आसीत् ?*
*(६) तस्य पुत्रः कथमन्धत्वं प्राप्तः ?*
*(७) "तन्मित्रं यत्र विश्वासः" कस्येदं वाक्यम् ?*

### युनिट-२

**प्रश्नः -५ कस्यचिदेकस्य ससन्दर्भं विवेचनं कुरुत ।** ०४

*(१) अहोऽतीव सुभाग्याहं यस्या मे दयितः पतिः ।*
*असतो वा सतो वापि गुणानेवं प्रभाषते ॥*

*(२) अहो नु रमणीयस्त्वमहो वासि मनोहरः ।*
*प्रीयामहे त्वया नित्यं तरूप्रवर शाल्मले ॥*

*(३) लोभात् क्रोधः प्रभवति लोभात् कामः प्रवर्तते ।*
*लोभान्मोहश्च माया च मानः स्तम्भः परासुता ॥*

**प्रश्नः -६ शाल्मलिप्रसङ्गं विवेचयत । १२**

**अथवा**

**कपोतकपोतीप्रसङ्गं सविस्तरं लिखत ।**

**प्रश्नः -७ टिप्पणीद्वयं लिखत । ०४**

*(१) अतिथिसत्कारः ।* *(२) अहङ्कारः ।*

*(३) ब्रह्महत्यापापम् ।* *(४) गृध्रः ।*

**युनिट-३**

**प्रश्नः -८ पद्यद्वयस्य सप्रसङ्गं व्याख्यां कुरुत । ०८**

*(१) शकुनीनामिवाकाशे जले वारिचरस्य च ।*
*यथा गतिर्न दृश्येत तथा तस्य न संशयः ॥*

*(२) सर्वमेतत् तपोमूलं कवयः परिपक्षते ।*
*न ह्यतप्ततपो मूढः क्रियाफलमवाप्नुते ॥*

*(३) ब्राह्मणेभ्यः प्रदायाग्रं यः सुहृद्भिः सहाश्नुते ।*
*स प्रेत्य लभते स्वर्गमिह चानन्त्यमश्नुते ॥*

**प्रश्नः -९ ग्रन्थानुसारं पाण्डवोक्तं पुरुषार्थ चतुष्टयं वर्णयत । १२**

**अथवा**

**गौतमकथां सविस्तरं लिखत ।**

**प्रश्नः -१० पञ्चानां लघूत्तराणि लिखत । ०५**

*(१) विरूपाक्षः कः आसीत् ?*

*(२) विरूपाक्षः कस्य सखा आसीत् ?*

*(३) कुत्र निषकृतिः न भवति ?*

*(४) पुरन्दरः नाम कः ?*

*(५) कतिविधा अर्थसिद्धिः प्रोक्ता ?*

*(६) राजधर्मा कस्य सुतः आसीत् ?*

*(७) "सुहृद्" इत्यस्य को व्युत्पत्तिजन्योऽर्थः ?*

---------------------